International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(4): 33-35
© 2023 IJSR
www.anantaajournal.com
Received: 01-04-2023
Accepted: 13-05-2023

**रा. गुरुप्रसादः**
शोधच्छात्रः, संस्कृतविभागः,
मद्रास् विश्वविद्यालयः, चेन्नई,
तमिल नाडु, भारत

**Corresponding Author:**
**रा. गुरुप्रसादः**
शोधच्छात्रः, संस्कृतविभागः,
मद्रास् विश्वविद्यालयः, चेन्नई,
तमिल नाडु, भारत

# “वृद्धिरादैच्” इति सूत्रविचारः

## रा. गुरुप्रसादः

**सारांश**

शोधपत्रस्यास्य प्रमुखोद्देश्यं तावत् पाणिनीये सूत्रविचाराणां स्थालीपुलाकन्यायेन “वृद्धिरादैच्” इति पाणिनीय-अष्टाध्यायीग्रन्थस्य आदिभूतं मङ्गळरूपं सूत्रं विभिन्नग्रन्थदिशा सुस्पष्टतया विचाराणामवबोधः। तथा च – वृद्धिरादैच् इति सूत्रे “आदैच्” इति पदस्य समासविचारः, लघुशब्देन्दुशेखरग्रन्थदिशा प्रकृतसूत्रसम्बद्धपदत्रयविचारः, एवं प्रकृतसूत्रमिदं संज्ञा आहोस्वित् विधिः इत्येवमादि विचाराः सप्रमाणं स्फुटतया प्रतिपाद्यन्ते। तत्रापि प्रसङ्गानुसारं विचारगतसूत्राणामुल्लेखनञ्च क्रियते।

**कुटशब्दः** वृद्धिः, आदैच्, पदसंज्ञा, भसंज्ञा, तपरत्वम्, सूत्रम् इत्यादि

## प्रस्तावना

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः॥[1]

एकस्य सूत्रस्य सम्यगर्थवबोधनाय प्रकरणग्रन्थादारभ्य प्रौढग्रन्थसमालोचनपुरस्सरं भाष्यग्रन्थः समवलोक्यते विद्वद्भिः। तथा क्लिष्टभूतांशान् सूत्रगतविचारान् सुस्पष्टीकर्तुम् अन्यतमं सूत्रं तत्रापि विशिष्य पाणिनिमहर्षिणा मङ्गळरूपतया प्रणीतं सूत्रम् आधारीकृत्य प्रबन्धोऽयं सङ्ग्रथ्यते। अत्र साध्वसाधुनिर्णयं मनीषिण एव कुर्वन्तु इति विनिवेद्यते।
अत्र प्रबन्धेऽस्मिन् आचार्यपाणिनिविरचिताष्टाध्यायाय्याः प्रथमाध्यायस्य प्रथमपादस्थं प्रथमं सूत्रं वृद्धिरादैच् इति स्वीकृत्य तत्सूत्रगतविषयाः विचाराश्च सप्रमाणं निरूपयितुं यत्नः कृतः। वृद्धिरादैच् [2] इति सूत्रस्यच्छेदस्तु वृद्धिः आदैच् इति। अत्र “वृद्धि”पदं वृद्धिसंज्ञाबोधकपरम्। एवम् आदैच् इति तावत् वृद्धिसंज्ञिबोधकपरम्। “आदैच्” इत्यत्र तु आत् च ऐच् च इत्यनयोः समाहारः इति “चार्थे द्वन्द्वः[3]” इत्यनेन समाहारद्वन्द्वसमासः क्रियते।

---

[1] पा.उप - चतुर्थोऽध्यायः; वि.ध.पु - पञ्चमोऽध्यायः।

[2] पा.सू - १-१-१

[3] पा.सू - २-२-२९

अत्र "द्वन्द्वाच्चुदषहान्तात् समाहारे[4]" इत्यनेन समाहारद्वन्द्वसमासस्य अन्ते यदि चवर्गादिवर्णाः स्युः, तर्हि समासान्तप्रत्ययः टच् स्यात्। प्रकृते आदैच् इत्यत्र चवर्णान्तः समाहारद्वन्द्वसमासः अस्ति इति कारणात् टच्प्रत्ययस्य आशङ्का क्रियते। परन्तु तन्निषिध्यते समासान्तविधेः अनित्यत्वात्। तत्र प्रमाणन्तु - "द्वित्रिभ्यां ष मूर्ध्नः[5]" इति सूत्रम्। एवम् आदैच् इत्यत्र "चोः कुः[6]" इत्यनेन पदान्ते विद्यमानस्य चवर्गीयस्य कुत्वविधिरपि नास्ति। यतो हि "अयस्मयादीनि च्छन्दसि[7]" इति सूत्रेण कुत्वविधौ कर्तव्ये "स्वादिष्वसर्वनामस्थाने[8]" इत्यनेन पदसंज्ञां बाधित्वा "यचि भम्[9]" भसंज्ञा क्रियते, तेन कुत्वनिषेधः भवति। अतः आदैच् इत्यत्र न कुत्वम् इति।

एवं पाणिनीयसूत्राणां यथा वा पदपाठः सन्दृश्यते वृद्धिरादैच्, अदेङ्गुणः इत्येवम्। तथैव संहितापाठोऽपि विद्यते - वृद्धिरादैजदेङ्गुणः इत्येवम्। तेन प्रकृते वृद्धिरादैजदेङ्गुणः इति संहितापाठे जश्त्वं कथं सिद्ध्यति। यतो हि जश्त्वप्रवृत्तये निमित्तं तु पदत्वम्। पूर्वं पदत्वं बाधित्वैव भसंज्ञा प्रवृत्ता इत्युक्तत्वात् प्रकृते पदत्वं, तन्निमित्तीकृत्य झलां जशोऽन्ते इति सूत्रेण जश्त्वं च कथं प्रवृत्तमिति शङ्का उदेति। तस्य समाधानं तु "अयस्मयादीनि छन्दसि" इति सूत्रोपात्तं वार्तिकम् "उभयसंज्ञान्यपीति वक्तव्यम्" इति। वार्तिकस्य तात्पर्यन्तु अयस्मयादीनाम् सिद्धौ प्रकृतेः पदसंज्ञा अथवा भसंज्ञा इति उभे अपि संज्ञे यथायोग्यम् साधु मन्तव्यम् इति। यतः अयस्मयादीनाम् आकृतिगणत्वात् आचार्यपाणिनिप्रणीतसूत्राणां छान्दसत्वाच्च "आदैच्" इत्यस्य पदसंज्ञायां जश्त्वे कृते वृद्धिरादैजदेङ्गुणः इति संहितापाठोऽपि साधुरेव।

पुनरत्र भपदसंज्ञयोः विषये आक्षेपः क्रियते यत् उभयसंज्ञान्यपीति वक्तव्यम् इति वार्तिकबलात् यथावकाशं भपदसंज्ञाद्वयस्यापि प्रवृत्तिसत्त्वे पदसंज्ञायां सत्यां कुत्वाभावः भसंज्ञायां च सत्यां जश्त्वाभावः कुतो न स्यात् इति। तत्र समाधानन्तु - "छन्दसि दृष्टानुविधिः" इति महाभाष्यस्थवार्तिकम्[10]। अस्यार्थस्तु वेदे यथा पदं दृश्यते तथा तस्य प्रक्रिया कल्पनीया भवति। तेन सूत्रस्य च छान्दसत्वात् यथादृष्टं तथैव तस्य प्रक्रियाकल्पनं कर्तव्यम्। अतः कुत्वजश्त्वभावशङ्का निवर्तते।

पुनश्च यथा वा आदैच् इत्यत्र समाहारद्वन्द्वसमासः इति पक्षः विचारितः, तथैव प्रकारान्तरेण आदैच् इति आत् च ऐच् च् इति इतेरयोगद्वन्द्वसमासः इति प्रतिपाद्यते। तर्हि तस्य पदस्य द्विवचनान्तत्त्वं कुतो न इति प्रश्ने ऋषिप्रणीतत्वात् सौत्रत्वम् तस्य, अतः तत्पदं साधु इति समाहितम्।

अथ च लघुशब्देन्दुशेखरे नागेशभट्टेन प्रकृतसूत्रस्य व्याख्यावेलायाम् आदावेव पदत्रयविभागः कृतः विद्यते - वृद्धिः, आत्, ऐच् इति। तेन च समासान्तविधिविषये क्लेशः न स्यात्। एवञ्च समाहारेतरेतरद्वन्द्वसमासाद्याकाङ्क्षा नोदेति। पदच्छेदे आत् इत्यत्र तकारः अन्ते श्रूयते। तस्मात् तकारात् परत्र विद्यमानस्य ऐचः "तपरस्तत्कालस्य" इति सूत्रेण तपरकरणात् ऐच् - ऐकारौकारयोः तत्कालस्यैव संज्ञा स्यात्। तर्हि दीर्घैकारौकाराणामेव वृद्धिसंज्ञा प्राप्नोति, न तु प्लुतादीनाम्। ऐचः तपरत्वन्तु तपरशब्दस्य तात् परः तपरः इति पञ्चमीतत्पुरुषसमासमाश्रित्य तकारात् परत्र विद्यमानस्य ऐचः तपरकरणम्। तपरशब्दस्यैव अपरोऽपि पक्षः अस्ति - तः परः यस्मात् सः इति बहुव्रीहिसमासमाश्रित्य। तदनुसारेण आत् इत्यत्र आकारस्य तपरत्वं नेष्यते। यतो हि तपरसूत्रे अण्ग्रहणानुवृत्त्यभावेऽपि जातिपक्षे आकारादिभिर्दीर्घैः स्वस्वसमानकालिकस्य वाच्यताया लोकत एव सिद्धत्वेन तेषु तपरसूत्रप्रवृत्तिः व्यर्था। एवं अणुदित्सवर्णस्य चाप्रत्ययः इति ग्रहणकशास्त्रस्य वर्णसमाम्नायगतवर्णविषयकत्वात् वर्णसमाम्नाये च आकारादीनामसत्त्वात् इतरनिवृत्तिफलकस्य तपरत्वस्य तत्र प्रवृत्तिः नास्ति। अतः बहुव्रीहिपक्षः नादृतः। तर्हि आत् इत्यत्र तपरप्रयोजनन्तु सन्देहनिवृत्तिः। तपरशब्दस्य तत्पुरुषसमासमाश्रयणे फलं तावत् "तादपि परः तपरः[11]" इति काशिकास्थेन "अपि" शब्देन पञ्चमीतत्पुरुषोऽपि तपरः इत्येव स्वीक्रियते। ऐजर्थं तपरकरणं कृतमिति। वृक्ष + एलका इत्यादि स्थले वृद्धिकार्यसिद्ध्यर्थं तपरकरणमिति। यदि ऐजर्थं तपरकरणं न क्रियेत, तर्हि वृक्षैलका इत्यादिषु त्रिमात्राकालिक-ऐकारस्यैव वृद्धिः स्यात्। एवमेव खट्वा ओदनम् इत्यत्रापि आकारः द्विमात्रिकः ओकारस्य द्विमात्रिकः तयोः द्वयोः स्थाने आन्तरतम्यात् चतुर्मात्रिकः औकारः प्रसज्येत। तथा त्रिमात्रा-चतुर्मात्रादीनां वृद्धिसंज्ञावारणाय तपरकरणं कृतं विद्यते।

अपरञ्च काशिकाग्रन्थे प्रकृतसूत्रस्य विचारसन्दर्भे तद्भावितातद्भावितशब्दौ प्रयुज्येते ग्रन्थकर्त्रा। तयोश्च अयमाशयः - येषां वर्णानां निर्देशेन वृद्धिः सिद्ध्यति, ते वर्णाः तद्भाविताः। सरलार्थस्तु वृद्ध्युपदेशं विना यत्र वृद्धिसंज्ञकवर्णाः भवन्ति, ते तद्भाविताः। यथा - खट्वौदनम् इत्यादि। एवमेव वृद्ध्युपदेशं विना यत्र वृद्धिसंज्ञकवर्णाः भवन्ति ते अतद्भाविताः इति। यथा - सीता इत्यादि शब्देषु स्वतः आकारः अस्ति, अयम् अतद्भावितवर्णः।

[4] पा.सू - ५-४-१०६

[5] पा.सू - ५-४-११५

[6] पा.सू - ८-२-३०

[7] पा.सू - १-४-२०

[8] पा.सू - १-४-१७

[9] पा.सू - १-४-१८

[10] काम्यच - ३.१.९

[11] तपरस्तत्कालस्य - १.१.७०

एवं लघुशब्देन्दुशेखरे सूत्रे वृद्धिशब्दस्यैव संज्ञात्वमस्ति इति व्याख्यानतः लभ्यते। यदि आदैच्, वृद्धि इत्युभयोः वाक्यार्थे तादात्म्याङ्गीकारात् आदैच् शब्दस्य पूर्वपाठः अस्तु इति प्रश्ने मङ्गलार्थं वृद्धिशब्दस्य आदिमतया उच्चारितत्वात्। सूत्रस्य विधित्वमपि अस्ति इति वदन्ति केचित्। आदैचः उद्दिश्य वृद्धिसंज्ञा विधीयते। प्रायशः अदेङ्गुणः इत्यादिसूत्रेषु विधेयस्य परपाठ एव कृतः अस्ति। अथापि वृद्धिसंज्ञासूत्रे आदौ प्रयुक्तस्य वृद्धिशब्दस्य अविधेयत्वभ्रमनिवारणाय भाष्ये अपृक्त एकाल् प्रत्ययः इत्यत्रापि आदिमतया एव विधेयस्य विधानात्।

पुनः शङ्का उदेति यत् संज्ञासूत्राणां कथं विधित्वं स्यादिति। तत्र समाधानम् "सर्वे सवार्थवाचकाः" इति वचनबलात् अज्ञातशक्तिज्ञापकद्वारा संज्ञासूत्राणामपि विधित्वं स्यादेव इति लभ्यते। एवं योगिनां दृष्ट्या "सर्वे सवार्थवाचकाः" इति पक्षः सङ्गच्छते योगिनां सर्वशब्दार्थज्ञानवत्वात्। परन्तु अस्माकं दृष्ट्या सर्वेषां शब्दानां सर्वेषाम् अर्थानां च ज्ञानाभावात्। तर्हि योगिदृष्ट्या शब्दत्वेन अर्थत्वेन च सर्वार्थवाचकप्रकारकं ज्ञानं सफलं भवतु इति चेत्, न। यतो हि शास्त्रं तावत् अस्मान् उद्दिश्य एव प्रवृत्तम् इति ज्ञातव्यम्।

## उपसंहार

एवं "वृद्धिरादैच्" इति सूत्रस्य विचाराः अग्रे विस्तृततया प्रवर्तन्ते। एवंप्रकारेण बहूनां प्रौढग्रन्थानां वैयाकरणसिद्धान्तकौमुदीप्रभृति भाष्यपर्यन्तग्रन्थानां समालोडनेन प्रतिसूत्रस्य गभीरतयाध्ययनेन शास्त्रपरम्परायाः विचारधारा निरन्तरं प्रवर्तमाना आगामि कालस्य विचारसरण्याः मार्गदर्शनाय अवश्यं कल्पते इत्यत्र नास्ति विप्रतिपत्तिः। शास्त्रपरम्परा अविच्छिन्ना प्रवर्तेत इति धिया अल्पमत्या शोधकर्त्रा विदुषां सन्निधौ शोधप्रबन्धः समर्पितः इति शम्॥

## सङ्केताक्षरसूची

1. पा.सू – पाणिनीयसूत्राणि
2. पा.उप – पाराशरोपपुराणम्
3. वि.ध.पु – विष्णुधर्मोत्तरपुराणम्

## ससन्दर्भग्रन्थसूची

1. लघुशब्देशेखरः (अव्ययीभावान्तः भागः) – नागेशभट्टः – भार्गव-पुस्तकालयः, गायघाट, काशी – १९३६.
2. काशिका (न्यासपदमञ्जरीसहिता) – जयादित्यवामनौ – तारा प्रिन्टिङ् वर्क्स् – वाराणसी –१९८६
3. वैयाकरणसिद्धान्तकौमुदी – भट्टोजिदीक्षितः – मोतिलाल् बनारसीदास्, दिल्ली – २०११.
4. पाराशरोपपुराणम् – सम्पादकः कपिलदेवत्रिपाठी – सम्पूर्णानन्दविश्वविद्यालयः, वाराणसी – १९९०.
5. https://ashtadhyayi.com/sutraani/1/1/1